# Nitishatamam of Bhartrihari

The Nitishatakam is divided into ten sections, named by the author as ‘paddhati’s. They are the

1. মূর্খ পদ্ধতি(murkha-paddhati) – শ্লোক 1-14
2. বিদ্বৎ পদ্ধতি (vidvat-paddhati) – শ্লোক 15-28
3. মানশৌর্য পদ্ধতি (manashaurya-paddhati) – শ্লোক 29-38
4. অর্থ পদ্ধতি (artha-paddhati) – শ্লোক 39-57
5. দূর্জন পদ্ধতি (durjana-paddhati) – শ্লোক 58-61
6. সুজন পদ্ধতি (sujana-paddhati) – শ্লোক 62-69
7. পরোপকার পদ্ধতি (paropakara-paddhati) – শ্লোক 70-79
8. ধর্য্য পদ্ধতি (dhairya-paddhati) – শ্লোক 80-84
9. দৈব পদ্ধতি (daiva-paddhati) – শ্লোক 85-94
10. কর্ম পদ্ধতি (karma-paddhati) – শ্লোক 95-110

Each paddhati has ten verses. Thus, the total number of verses in the Niti Shatakam comes to 100. However, there are many variant readings for this text, the result of which there are nearly 130 verses which are ascribed to the Niti Shatakam in various editions.
The current course follows the Shatakatrayam of Bhartrihari edited by Vasudev Lakshman Sastri Pansikar – Nirnaya Sagar – sixth edition – 1922.

## নীতিশতকং ভর্তৃহরিকৃত

মঙ্গলাচরণ -

দিক্কালাদ্যনবচ্ছিন্নানন্তচিন্মাত্রমূর্তয়ে ।
স্বানুভূত্যেকনামায় নমঃ শান্তায় তেজসে ॥ ১॥

মূর্খপদ্ধতি -

যাং চিন্তয়ামি সততং ময়ি সা বিরক্তা
সাপ্যন্যমিচ্ছতি জনং স জনোঽন্যসক্তঃ ।
অস্মৎকৃতে চ পরিশুষ্যতি কাচিদন্যা
ধিক্ তাং চ তং চ মদনং চ ইমাং চ মাং চ ॥ ২॥

অজ্ঞঃ সুখমারাধ্যঃ সুখতরমারাধ্যতে বিশেষজ্ঞঃ ।
জ্ঞানলবদুর্বিদগ্ধং ব্রহ্মাপি নরং ন রঞ্জয়তি ॥ ৩॥

প্রসহ্য মণিমুদ্ধরেন্মকরবক্ত্রদংষ্ট্রাঙ্কুরা-
ৎসমুদ্রমপি সন্তরেৎপ্রচলদুর্মিমালাকুলম্ ॥

ভুজঙ্গমপি কোপিতং শিরসি পুষ্পবদ্ধারয়ে-
ন্ন তু প্রতিনিবিষ্টমূর্খজনচিত্তমারাধয়েৎ ॥ ৪॥

লভেত সিকতাসু তৈলমপি যত্নতঃ পীড়য়ন্
পিবেচ্চ মৃগতৃষ্ণিকাসু সলিলং পিপাসার্দিতঃ ।

কদাচিদপি পর্যটনশশবিষাণমাসাদয়েন্
          ন তু প্রতিনিবিষ্টমূর্খজনচিত্তমারাধয়েৎ ॥ ৫॥

ব্যালং বালমৃণালতন্তুভিরসৌ রোদ্ধুং সমুজ্জৃম্ভতে
          ছেত্তুং বজ্রমণীং শিরীষকুসুমপ্রান্তেন সন্নহ্যতি ।
মাধুর্যং মধুবিন্দুনা রচয়িতুং ক্ষারাম্বুধেরীহতে
          নেতুং বাঞ্ছতি যঃ খলান্পথি সতাং সূক্তৈঃ সুধাস্যন্দিভিঃ ॥ ৬॥

স্বায়ত্তমেকান্তগুণং বিধাত্রা
          বিনির্মিতং ছাদনমজ্ঞতায়াঃ ।
বিশেষতঃ সর্ববিদাং সমাজে
          বিভূষণং মৌনমপণ্ডিতানাম্ ॥ ৭॥

যদা কিঞ্চিজ্জ্ঞোঽহং গজ ইব মদান্ধঃ সমভবম্
          তদা সর্বজ্ঞোঽস্মীত্যভবদবলিপ্তং মম মনঃ ।
যদা কিঞ্চিৎকিঞ্চিদ্বুধজনসকাশাদবগতম্
          তদা মূর্খোঽস্মীতি জ্বর ইব মদো মে ব্যপগতঃ ॥ ৮॥

কৃমিকুলচিতং লালাক্লিন্নং বিগন্ধি জুগুপ্সিতং
          নিরুপমরসং প্রীত্যা খাদন্নরাস্থি নিরামিষম্ ।
সুরপিতমপি শ্বা পার্শ্বস্থং বিলোক্য ন শঙ্কতে
          ন হি গণয়তি ক্ষুদ্রো জন্তুঃ পরিগ্রহফল্গুতাম্ ॥ ৯॥

শিরঃ শার্বং স্বর্গাৎপশুপতিশিরস্তঃ ক্ষিতিধরং
          মহীধ্রাদুত্তুঙ্গাদবনিমবনেশ্চাপি জলধিম্ ।
অধোঽধো গঙ্গেয়ং পদমুপগতা স্তোকমথবা
          বিবেকভ্রষ্টানাং ভবতি বিনিপাতঃ শতমুখঃ ॥ ১০॥

শক্যো বারয়িতুং জলেন হুতভুক্ছত্রেণ সূর্যাতপো
          নাগেন্দ্রো নিশিতাঙ্কুশেন সমদো দণ্ডেন গোগর্দভৌ ।
ব্যাধির্ভেষজসংগ্রহৈশ্চ বিবিধৈর্মন্ত্রপ্রয়োগৈর্বিষং
          সর্বস্যৌষধমস্তি শাস্ত্রবিহিতং মূর্খস্য নাস্ত্যৌষধম্ ॥ ১১॥

সাহিত্যসঙ্গীতকলাবিহীনঃ সাক্ষাৎপশুঃ পুচ্ছবিষাণহীনঃ ।
তৃণং ন খাদন্নপি জীবমানঃ তদ্ভাগধেয়ং পরমং পশূনাম্ ॥ ১২॥

যেষাং ন বিদ্যা ন তপো ন দানং
          জ্ঞানং ন শীলং ন গুণো ন ধর্মঃ ।
তে মর্ত্যলোকে ভুবি ভারভূতাঃ
          মনুষ্যরূপেণ মৃগাশ্চরন্তি ॥ ১৩॥

বরং পর্বতদুর্গেষু ভ্রান্তং বনচরৈঃ সহ ।
ন মূর্খজনসম্পর্কঃ সুরেন্দ্রভবনেষ্বপি ॥ ১৪॥

বিদ্বৎপদ্ধতি -

শাস্ত্রোপস্কৃতশব্দসুন্দরগিরঃ শিষ্যপ্রদেয়াগমা
বিখ্যাতাঃ কবয়ো বসন্তি বিষয়ে যস্য প্রভোর্নির্ধনাঃ ।
তজ্জাড্যং বসুধাধিপস্য কবয়স্ত্বর্থং বিনাপীশ্বরাঃ
কুৎস্যাঃ স্যুঃ কুপরীক্ষকা ন মণয়ো যৈরর্ঘতঃ পাতিতাঃ ॥ ১৫॥

হর্তুর্যাতি ন গোচরং কিমপি শং পুষ্ণাতি যৎ সর্বদা-
হ্যপ্যর্থিভ্যঃ প্রতিপাদ্যমানমনিশং প্রাপ্নোতি বৃদ্ধিং পরাম্ ।
কল্পান্তেষ্বপি ন প্রয়াতি নিধনং বিদ্যাখ্যমন্তর্ধনং
যেষাং তান্ প্রতি মানমুজ্ঝত নৃপাঃ কস্তৈঃ সহ স্পর্ধতে ॥ ১৬॥

অধিগতপরমার্থান্ পণ্ডিতান্ মাবমংস্থা-
স্তৃণমিব লঘু লক্ষ্মীর্নৈব তান্ সংরুণদ্ধি ।
অভিনবমদলেখাশ্যামগণ্ডস্থলানাং
ন ভবতি বিষতন্তুর্বারণং বারণানাম্ ॥ ১৭॥

অম্ভোজিনীবনবিহারবিলাসমেব
হংসস্য হন্তি নিতরাং কুপিতো বিধাতা ।
ন ত্বস্য দুগ্ধজলভেদবিধৌ প্রসিদ্ধাং
বৈদগ্ধ্যকীর্তিমপহর্তুমসৌ সমর্থঃ ॥ ১৮॥

কেয়ূরাণি ন ভূষয়ন্তি পুরুষং হারা ন চন্দ্রোজ্জ্বলা
ন স্নানং ন বিলেপনং ন কুসুমং নালঙ্কৃতা মূর্ধজাঃ ।
বাণ্যেকা সমলঙ্করোতি পুরুষং যা সংস্কৃতা ধার্যতে
ক্ষীয়ন্তে খলু ভূষণানি সততং বাগ্ভূষণং ভূষণম্ ॥ ১৯॥

বিদ্যা নাম নরস্য রূপমধিকং প্রচ্ছন্নগুপ্তং ধনং
বিদ্যা ভোগকরী যশস্সুখকরী বিদ্যা গুরূণাং গুরুঃ ।
বিদ্যা বন্ধুজনো বিদেশগমনে বিদ্যা পরা দেবতা
বিদ্যা রাজসু পূজিতা ন তু ধনং বিদ্যাবিহীনঃ পশুঃ ॥ ২০॥

ক্ষান্তিশ্চেৎ কবচেন কিং কিমরিভিঃ ক্রোধোঽস্তি চেদ্দেহিনাং
জ্ঞাতিশ্চেদনলেন কিং যদি সুহৃদ্ দিব্যৌষধৈঃ কিং ফলম্ ।
কিং সর্পৈর্যদি দুর্জনাঃ কিমু ধনৈর্বিদ্যা ন বন্দ্যা যদি
ব্রীডা চেৎকিমু ভূষণৈঃ সুকবিতা যদ্যস্তি রাজ্যেন কিম্ ॥ ২১॥

দাক্ষিণ্যং স্বজনে দয়া পরজনে শাঠ্যং সদা দুর্জনে
প্রীতিঃ সাধুজনে নয়ো নৃপজনে বিদ্বজ্জনে চার্জবম্ ।
শৌর্যং শত্রুজনে ক্ষমা গুরুজনে কান্তাজনে ধৃষ্টতা
যে চৈবং পুরুষাঃ কলাসু কুশলাস্তেষ্বেব লোকস্থিতিঃ ॥ ২২॥

জাড্যং ধিয়ো হরতি সিঞ্চতি বাচি সত্যং
মানোন্নতিং দিশতি পাপমপাকরোতি ।
চেতঃ প্রসাদয়তি দিক্ষু তনোতি কীর্ত্তিং
সৎসঙ্গতিঃ কথয় কিং ন করোতি পুংসাম্ ॥ ২৩॥

জয়ন্তি তে সুকৃতিনঃ রসসিদ্ধাঃ কবীশ্বরাঃ ।
নাস্তি যেষাং যশঃকায়ে জরামরণজং ভয়ম্ ॥ ২৪॥

সূনুঃ সচ্চরিতঃ সতী প্রিয়তমা স্বামী প্রসাদোন্মুখঃ
স্নিগ্ধং মিত্রমবঞ্চকঃ পরিজনো নিষ্ক্লেশলেশং মনঃ ।
আকারো রুচিরঃ স্থিরশ্চ বিভবো বিদ্যাবদাতং মুখং
তুষ্টে বিষ্টপকষ্টহারিণি হরৌ সম্প্রাপ্যতে দেহিনা ॥ ২৫॥

প্রাণাঘাতান্নিবৃত্তিঃ পরধনহরণে সংয়মঃ সত্যবাক্যং
কালে শক্ত্যা প্রদানং যুবতিজনকথামূকভাবঃ পরেষাম্ ।
তৃষ্ণাস্রোতোবিভঙ্গো গুরুষু চ বিনয়ঃ সর্বভূতানুকম্পা
সামান্যঃ সর্বশাস্ত্রেষ্বনুপহতবিধিঃ শ্রেয়সামেষ পন্থাঃ ॥ ২৬॥

প্রারভ্যতে ন খলু বিঘ্নভয়েন নীচৈঃ
প্রারভ্য বিঘ্নবিহতা বিরমন্তি মধ্যাঃ ॥

বিঘ্নৈঃ পুনঃ পুনরপি প্রতিহন্যমানাঃ
প্রারব্ধমুত্তমগুণা ন পরিত্যজন্তি ॥ ২৭॥

অসন্তো নাভ্যর্থ্যাঃ সুহৃদপি ন যাচ্যঃ কৃশধনঃ
প্রিয়া ন্যায়্যা বৃত্তির্মলিনমসুভঙ্গেঽপ্যসুকরম্ ।
বিপদ্যুচ্চৈঃ স্থেয়ং পদমনুবিধেয়ং চ মহতাং
সতাং কেনোদ্দিষ্টং বিষমমসিধারাব্রতমিদম্ ॥ ২৮॥

ক্ষুৎক্ষামোঽপি জরাকৃশোঽপি শিথিলপ্রায়োঽপি কষ্টাং দশাম্
আপন্নোঽপি বিপন্নদীধিতিরপি প্রাণেষু গচ্ছৎস্বপি ।
মত্তেভেন্দ্রবিভিন্নকুম্ভকবলগ্রাসৈকবদ্ধস্পৃহঃ
কিং জীর্ণং তৃণমত্তি মানমহতামগ্রেসরঃ কেসরিঃ ॥ ২৯॥

স্বল্পস্নায়ুবসাবশেষমলিনং নির্মাংসমপ্যস্থিকং
শ্বা লব্ধ্বা পরিতোষমেতি ন তু তত্তস্য ক্ষুধাশান্তয়ে ।
সিংহো জম্বুকমঙ্কমাগতমপি ত্যক্ত্বা নিহন্তি দ্বিপং
সর্বঃ কৃচ্ছ্রগতোঽপি বাঞ্ছতি জনঃ সত্ত্বানুরূপং ফলম্ ॥ ৩০॥

লাঙ্গুলচালনমধশ্চরণাবপাতং
ভূমৌ নিপত্য বদনোদরদর্শনং চ ।
শ্বা পিণ্ডদস্য কুরুতে গজপুঙ্গবস্তু
ধীরং বিলোকয়তি চাটুশতৈশ্চ ভুঙ্ক্তে ॥ ৩১॥

পরিবর্তিনি সংসারে মৃতঃ কো বা ন জায়তে ।

স জাতো যেন জাতেন যাতি বংশঃ সমুন্নতিম্ ॥ ৩২॥

কুসুমস্তবকস্যেব দ্বয়ী বৃত্তির্মনস্বিনঃ ।
মূর্ধ্নি বা সর্বলোকস্য বিশীর্যেত বনেঽথবা ॥ ৩৩॥

সন্ত্যন্যেঽপি বৃহস্পতিপ্রভৃতয়ঃ সম্ভাবিতাঃ পঞ্চষাঃ
তান্ প্রত্যেষ বিশেষবিক্রমরুচী রাহুর্ন বৈরায়তে ।
দ্বাবেব গ্রসতে দিবাকরনিশাপ্রাণেশ্বরৌ ভাস্বরৌ
ভ্রাতঃ পর্বণি পশ্য দানবপতিঃ শীর্ষাবশেষাকৃতিঃ ॥ ৩৪॥

বহতি ভুবনশ্রেণিং শেষঃ ফণাফলস্থিতাং
কমঠপতিনা মধ্যে পৃষ্ঠং সদা চ ধার্যতে ।
তমপি কুরুতে ক্রোধাধীনং পয়োধিরনাদরা-
দহহ মহতাং নিঃসীমানশ্চরিত্রবিভূতয়ঃ ॥ ৩৫॥

বরং পক্ষচ্ছেদঃ সমদমঘবন্মুক্তকুলিশ-
প্রহারৈরুদ্গচ্ছদ্বহুলদহনোদ্গারগুরুভিঃ ।
তুষারাদ্রেঃ সূনোরহহ পিতরি ক্লেশবিবশে
ন চাসৌ সম্পাতঃ পয়সি পয়সাং পত্যুরুচিতঃ ॥ ৩৬॥

যদচেতনোঽপি পাদৈঃ স্পৃষ্টঃ প্রজ্বলতি সবিতুরিনকান্তঃ ।
তত্তেজস্বী পুরুষঃ পরকৃতনিকৃতিং কথং সহতে ॥ ৩৭॥

সিংহঃশিশুরপি নিপততি মদমলিনকপোলভিত্তিষু গজেষু ।
প্রকৃতিরিয়ং সত্ত্ববতাং ন খলু বয়সস্তেজসো হেতুঃ ॥ ৩৮॥

অর্থপদ্ধতি -

জাতির্যাতু রসাতলং গুণগণৈস্তত্রাপ্যধো গম্যতাং
শীলং শৈলতটাৎপতত্বভিজনঃ সন্দহ্যতাং বহ্নিনা ।
শৌর্যে বৈরিণি বজ্রমাশু নিপতত্বর্থোঽস্তু নঃ কেবলং
যেনৈকেন বিনা গুণাস্তৃণলবপ্রায়াঃ সমস্তা ইমে ॥ ৩৯॥

তানীন্দ্রিয়াণ্যবিকলানি তদেব নাম
সা বুদ্ধিরপ্রতিহতা বচনং তদেব ।
অর্থোষ্মণা বিরহিতঃ পুরুষঃ ক্ষণেন
সোঽপ্যন্য এব ভবতীতি বিচিত্রমেতৎ ॥ ৪০॥

যস্যাস্তি বিত্তং স নরঃ কুলীনঃ
স পণ্ডিতঃ স শ্রুতবান্ গুণজ্ঞঃ ।
স এব বক্তা স চ দর্শনীয়ঃ
সর্বে গুণাঃ কাঞ্চনমাশ্রয়ন্তি ॥ ৪১॥

দৌর্মন্ত্র্যান্নৃপতির্বিনশ্যতি যতিঃ সঙ্গাৎ সুতো লালনাদ্
বিপ্রোঽনধ্যনাৎ কুলং কুতনয়াচ্ছীলং খলোপাসনাৎ ।
হ্রীর্মদ্যাদনবেক্ষণাদপি কৃষিঃ স্নেহঃ প্রবাসাশ্র-
যান্মৈত্রী চাপ্রণয়াৎ সমৃদ্ধিরনয়াৎ ত্যাগঃ প্রমাদাদ্ধনম্ ॥ ৪২॥

দানং ভোগো নাশস্তিস্রো গতয়ো ভবন্তি বিত্তস্য ।
যো ন দদাতি ন ভুঙ্‌ক্তে তস্য তৃতীয়া গতির্ভবতি ॥ ৪৩॥

মণিঃ শাণোল্লীঢঃ সমরবিজয়ী হেতিদলিতো
মদক্ষীবো নাগঃ শরদি সরিতঃ শ্যানপুলিনাঃ ।
কলাশেষশ্চন্দ্রঃ সুরতমৃদিতা বালবনিতা
তনিম্না শোভন্তে গলিতবিভবাশ্চার্থিষু নরাঃ ॥ ৪৪॥

পরিক্ষীণঃ কশ্চিৎস্পৃহয়তি যবানাং প্রসৃতয়ে
স পশ্চাৎ সম্পূর্ণঃ কলয়তি ধরিত্রীং তৃণসমাম্ ।
অতশ্চানৈকান্ত্যাদ্গুরুলঘুতয়াঽর্থেষু ধনিনা-
মবস্থা বস্তূনি প্রথয়তি চ সঙ্কোচয়তি চ ॥ ৪৫॥

রাজন্ দুধুক্ষসি যদি ক্ষিতিধেনুমেতাং
তেনাদ্য বৎসমিব লোকমমুং পুষাণ ।
তস্মিংশ্চ সম্যগনিশং পরিপোষ্যমাণে
নানাফলৈঃ ফলতি কল্পলতেব ভূমিঃ ॥ ৪৬॥

সত্যানৃতা চ পরুষা প্রিয়বাদিনী চ
হিংস্রা দয়ালুরপি চার্থপরা বদান্যা ।
নিত্যব্যয়া প্রচুরনিত্যধনাগমা চ
বারাঙ্গনেব নৃপনীতিরনেকরূপা ॥ ৪৭॥

আজ্ঞা কীর্তিঃ পালনং ব্রাহ্মণানাং
দানং ভোগঃ মিত্রসংরক্ষণং চ ।
যেষামেতে ষড্গুণা ন প্রবৃত্তাঃ
কোঽর্থস্তেষাং পার্থিবোপাশ্রয়েণ ॥ ৪৮॥

যদ্ধাত্রা নিজভালপট্টলিখিতং স্তোকং মহদ্বা ধনং
তৎ প্রাপ্নোতি মরুস্থলেঽপি নিতরাং মেরৌ ততো নাধিকম্ ।
তদ্ধীরো ভব বিত্তবৎসু কৃপণাং বৃত্তিং বৃথা মা কৃথাঃ
কূপে পশ্য পয়োনিধাবপি ঘটো গৃহ্ণাতি তুল্যং জলম্ ॥ ৪৯॥

ত্বমেব চাতকাধার ইতি কেষাং ন গোচরঃ ।
কিমম্ভোদ বদাস্মাকং কার্পণ্যোক্তিং প্রতীক্ষসে ॥ ৫০॥

রে রে চাতক সাবধানমনসা মিত্র ক্ষণং শ্রূয়তাম্
অম্ভোদা বহবো বসন্তি গগনে সর্বেঽপি নৈকাদৃশাঃ ।

কেচিদ্বৃষ্টিভিরার্দ্রয়ন্তি ধরণীং গর্জন্তি কেচিদ্বৃথা
যং যং পশ্যসি তস্য তস্য পুরতো মা ব্রূহি দীনং বচঃ ॥ ৫১॥

অকরুণত্বমকারণবিগ্রহঃ পরধনে পরয়োষিতি চ স্পৃহা ।
সুজনবন্ধুজনেষ্বসহিষ্ণুতা প্রকৃতিসিদ্ধমিদং হি দুরাত্মনাম্ ॥ ৫২॥

দুর্জনঃ পরিহর্তব্যো বিদ্যযালঙ্কৃতোঽপি সন্ ।
মণিনা ভূষিতঃ সর্পঃ কিমসৌ ন ভয়ঙ্করঃ ॥ ৫৩॥

জাড্যং হ্রীমতি গণ্যতে ব্রতরুচৌ দম্ভঃ শুচৌ কৈতবং
শূরে নির্ঘৃণতা মুনৌ বিমতিতা দৈন্যং প্রিয়ালাপিনি । (নিঘর্র্৬ইণতা ঋজো)
তেজস্বিন্যবলিপ্ততা মুখরতা বক্তর্যশক্তিঃ স্থিরে
তৎকো নাম গুণো ভবেৎস গুণিনাং যো দুর্জনৈর্নাঙ্কিতঃ ॥৫৪॥ (ভবেৎসুগুণিনাং)

লোভশ্চেদগুণেন কিং পিশুনতা যদ্যস্তি কিং পাতকৈঃ
সত্যং চেত্তপসা চ কিং শুচি মনো যদ্যস্তি তীর্থেন কিম্ ।
সৌজন্যং যদি কিং গুণৈঃ সুমহিমা যদ্যস্তি কিং মণ্ডনৈঃ
সদ্বিদ্যা যদি কিং ধনৈরপয়শো যদ্যস্তি কিং মৃত্যুনা ॥ ৫৫॥

শশী দিবসধূসরো গলিতয়ৌবনা কামিনী
সরো বিগতবারিজং মুখমনক্ষরং স্বাকৃতেঃ ।
প্রভুর্ধনপরায়ণঃ সততদুর্গতঃ সজ্জনো
নৃপাঙ্গণগতঃ খলো মনসি সপ্ত শল্যানি মে ॥ ৫৬॥

ন কশ্চিচ্চণ্ডকোপানামাত্মীয়ো নাম ভূভুজাম্ ।
হোতারমপি জুহ্বানং স্পৃষ্টো দহতি পাবকঃ ॥ ৫৭॥

মৌনান্মূকঃ প্রবচনপটুর্বাতুলো জল্পকো বা
ধৃষ্টঃ পার্শ্বে বসতি চ সদা দূরতশ্চাপ্রগল্ভঃ ।
ক্ষান্ত্যা ভীরুর্যদি ন সহতে প্রায়শো নাভিজাতঃ
সেবাধর্মঃ পরমগহনো যোগিনামপ্যগম্যঃ ॥ ৫৮॥

উদ্ভাসিতাখিলখলস্য বিশ্রুঙ্খলস্য
প্রাগ্জাতবিস্তৃতনিজাধমকর্মবৃত্তেঃ ।
দৈবাদবাপ্তবিভবস্য গুণদ্বিষোঽস্য
নীচস্য গোচরগতৈঃ সুখমাপ্যতে কৈঃ ॥ ৫৯॥

আরম্ভগুর্বী ক্ষয়িণী ক্রমেণ
লঘ্বী পুরা বৃদ্ধিমতী চ পশ্চাৎ ।
দিনস্য পূর্বার্ধপরার্ধভিন্না
ছায়েব মৈত্রী খলসজ্জনানাম্ ॥ ৬০॥

মৃগমীনসজ্জনানাং তৃণজলসন্তোষবিহিতবৃত্তিনাম্ ।
লুব্ধকধীবরপিশুনা নিষ্কারণবৈরিণো জগতি ॥ ৬১॥

বাঞ্ছা সজ্জনসঙ্গমে পরগুণে প্রীতির্গুরৌ নম্রতা
বিদ্যায়াং ব্যসনং স্বয়োষিতি রতির্লোকাপবাদাদ্ভয়ম্ ।
ভক্তিঃ শূলিনি শক্তিরাত্মদমনে সংসর্গমুক্তিঃ খলে
যেষ্বেতে নিবসন্তি নির্মলগুণাস্তেভ্যো নরেভ্যো নমঃ ॥ ৬২॥

বিপদি ধৈর্যমথাভ্যুদয়ে ক্ষমা সদসি বাক্পটুতা যুধি বিক্রমঃ ।
যশসি চাভিরুচির্ব্যসনং শ্রুতৌ প্রকৃতিসিদ্ধমিদং হি মহাত্মনাম্ ॥ ৬৩॥

প্রদানং প্রচ্ছন্নং গৃহমুপগতে সম্ভ্রমবিধিঃ
প্রিয়ং কৃত্বা মৌনং সদসি কথনং চাপ্যুপকৃতে ।
অনুৎসেকো লক্ষ্ম্যামনভিভবগন্ধাঃ পরকথাঃ
সতাং কেনোদ্দিষ্টং বিষমমসিধারাব্রতমিদম্ ॥ ৬৪॥

করে শ্লাঘ্যস্ত্যাগঃ শিরসি গুরুপাদপ্রণয়িতা
মুখে সত্যা বাণী বিজয়িভুজয়োর্বীর্যমতুলম্ ।
হৃদি স্বচ্ছা বৃত্তিঃ শ্রুতমধিগতং চ শ্রবণয়ো-
র্বিনাপ্যৈশ্বর্যেণ প্রকৃতিমহতাং মণ্ডনমিদম্ ॥ ৬৫॥

সম্পৎসু মহতাং চিত্তং ভবত্যুৎপলকোমলম্ ।
আপৎসু চ মহাশৈলশিলাসঙ্ঘাতকর্কশম্ ॥ ৬৬॥

সন্তপ্তায়সি সংস্থিতস্য পয়সো নামাপি ন জ্ঞায়তে
মুক্তাকারতয়া তদেব নলিনীপত্রস্থিতং রাজতে ।
স্বাত্যাং সাগরশুক্তিমধ্যপতিতং তন্মৌক্তিকং জায়তে
প্রায়েণাধমমধ্যমোত্তমগুণঃ সংসর্গতো জায়তে ॥ ৬৭॥

প্রীণাতি যঃ সুচরিতঃ পিতরং স পুত্রো
যদ্ভর্তুরেব হিতমিচ্ছতি তৎ কলত্রম্ ।
তন্মিত্রমাপদি সুখে চ সমক্রিয়ং যদ্
এতৎ ত্রয়ং জগতি পুণ্যকৃতো লভন্তে ॥ ৬৮॥

একো দেবঃ কেশবো বা শিবো বা
হ্যেকং মিত্রং ভূপতির্বা যতির্বা ।
একো বাসঃ পত্তনে বা বনে বা
হ্যেকা ভার্যা সুন্দরী বা দরী বা ॥ ৬৯॥

নম্রত্বেনোন্নমন্তঃ পরগুণকথনৈঃ স্বান্ গুণান্ খ্যাপয়ন্তঃ
স্বার্থান্ সম্পাদয়ন্তো বিততপৃথুতরারম্ভযত্নাঃ পরার্থে ।
ক্ষান্ত্যৈবাক্ষেপরুক্ষাক্ষরমুখরমুখান্ দুর্জনান্ দূষয়ন্তঃ
সন্তঃ সাশ্চর্যচর্যা জগতি বহুমতাঃ কস্য নাভ্যর্চনীয়াঃ ॥ ৭০॥

ভবন্তি নম্রাস্তরবঃ ফলোদ্গমৈ-
র্নবাম্বুভির্দূরবিলম্বিনো ঘনাঃ ।

অনুদ্ধতাঃ সৎপুরুষাঃ সমৃদ্ধিভিঃ
স্বভাব এবৈষ পরোপকারিণাম্ ॥ ৭১॥

শ্রোত্রং শ্রুতেনৈব ন কুণ্ডলেন
দানেন পাণির্ন তু কঙ্কণেন ।
বিভাতি কায়ঃ করুণাপরাণাং (বিভাতি কায়ঃ খলু সজ্জনানাং)
পরোপকারৈর্ন তু চন্দনেন ॥ ৭২॥

পাপান্নিবারয়তি যোজয়তে হিতায়
গুহ্যং নিগূহতি গুণান্ প্রকটীকরোতি ।
আপদ্গতং চ ন জহাতি দদাতি কালে
সন্মিত্রলক্ষণমিদং নিগদন্তি সন্তঃ ॥ ৭৩॥

পদ্মাকরং দিনকরো বিকচীকরোতি
চন্দ্রো বিকাসয়তি কৈরবচক্রবালম্ ।
নাভ্যর্থিতো জলধরোঽপি জলং দদাতি
সন্তঃ স্বয়ং পরহিতে বিহিতাভিয়োগাঃ ॥ ৭৪॥

এতে সৎপুরুষাঃ পরার্থঘটকাঃ স্বার্থং পরিত্যজ্য যে
সামান্যাস্তু পরার্থমুদ্যমভৃতঃ স্বার্থাবিরোধেন যে ।
তেঽমী মানবরাক্ষসাঃ পরহিতং স্বার্থায় বিঘ্নন্তি যে
যে বিঘ্নন্তি নিরর্থকং পরহিতং তে কে ন জানীমহে ॥ ৭৫॥

ক্ষীরেণাত্মগতোদকায় হি গুণা দত্তাঃ পুরা তেঽখিলাঃ
ক্ষীরোত্তাপমবেক্ষ্য তেন পয়সা স্বাত্মা কৃশাণৌ হুতঃ ।
গন্তুং পাবকমুন্মনস্তদভবদ্ দৃষ্ট্বা তু মিত্রাপদং
যুক্তং তেন জলেন শাম্যতি সতাং মৈত্রী পুনস্ত্বীদৃশী ॥ ৭৬॥

ইতঃ স্বপিতি কেশবঃ কুলমিতস্তদীয়দ্বীষা-
মিতশ্চ শরণার্থিনাং শিখরিণাং গণাঃ শেরতে ।
ইতোঽপি বডবানলঃ সহ সমস্তসম্বর্তকৈ-
রহো বিততমূর্জিতং ভারসহং চ সিন্ধোর্বপুঃ ॥ ৭৭॥

তৃষ্ণাং ছিন্ধি ভজ ক্ষমাং জহি মদং পাপে রতিং মা কৃথাঃ
সত্যং ব্রূহ্যনুয়াহি সাধুপদবীং সেবস্ব বিদ্বজ্জনম্ ।
মান্যান্ মানয় বিদ্বিষোঽপ্যনুনয় প্রখ্যাপয় প্রশ্রয়ং
কীর্তিং পালয় দুঃখিতে কুরু দয়ামেতৎ সতাং চেষ্টিতম্ ॥ ৭৮॥

মনসি বচসি কায়ে পুণ্যপীয়ূষপূর্ণাঃ
ত্রিভুবনমুপকারশ্রেণিভিঃ প্রীণয়ন্তঃ ।
পরগুণপরমাণূন্ পর্বতীকৃত্য নিত্যং
নিজহৃদি বিকসন্তঃ সন্তি সন্তঃ কিয়ন্তঃ ॥ ৭৯॥

কিং তেন হেমগিরিণা রজতাদ্রিণা বা
যত্রাশ্রিতাশ্চ তরবস্তরবস্ত এব ।
মন্যামহে মলয়মেব যদাশ্রয়েণ
কঙ্কোলনিম্বকুটজা অপি চন্দনাঃ স্যুঃ ॥ ৮০॥

রত্নৈর্মহার্হৈস্তুতুষুর্ন দেবা
ন ভেজিরে ভীমবিষেণ ভীতিম্ ।
সুধাং বিনা ন প্রয়যুর্বিরামং
ন নিশ্চিতার্থাদ্বিরমন্তি ধীরাঃ ॥ ৮১॥

ক্বচিৎ পৃথ্বীশয্যঃ ক্বচিদপি চ পর্যঙ্কশয়নঃ
ক্বচিচ্ছাকাহারঃ ক্বচিদপি চ শাল্যোদনরুচিঃ ।
ক্বচিৎ কন্থাধারী ক্বচিদপি চ দিব্যাম্বরধরো
মনস্বী কার্যার্থী ন গণয়তি চ দুঃখং ন চ সুখম্ ॥ ৮২॥

ঐশ্বর্যস্য বিভূষণং সুজনতা শৌর্যস্য বাক্সংয়মো
জ্ঞানস্যোপশমঃ শ্রুতস্য বিনয়ো বিত্তস্য পাত্রে ব্যয়ঃ ।
অক্রোধস্তপসঃ ক্ষমা প্রভবিতুর্ধর্মস্য নির্ব্যাজতা
সর্বেষামপি সর্বকারণমিদং শীলং পরং ভূষণম্ ॥ ৮৩॥

নিন্দন্তু নীতিনিপুণা যদি বা স্তুবন্তু
লক্ষ্মীঃ সমাবিশতু গচ্ছতু ব যথেষ্টম্ ।
অদ্যৈব বা মরণমস্তু যুগান্তরে বা
ন্যায্যাৎপথঃ প্রবিচলন্তি পদং ন ধীরাঃ ॥ ৮৪॥

পাতিতোঽপি করাঘাতৈরুৎপতত্যেব কন্দুকঃ ।
প্রায়েণ সাধুবৃত্তনামস্থায়িন্যো বিপত্তয়ঃ ॥ ৮৫॥

আলস্যং হি মনুষ্যাণাং শরীরস্থো মহারিপুঃ ।
নাস্ত্যুদ্যমসমো বন্ধুঃ কুর্বাণো নাবসীদতি ॥ ৮৬॥

ছিন্নোঽপি রোহতি তরুশ্চন্দ্রঃ ক্ষীণোঽপি বর্ধতে লোকে ।
ইতি বিমৃশন্তঃ সন্তঃ সন্তপ্যন্তে ন লোকেঽস্মিন্ ॥ ৮৭॥

নেতা যস্য বৃহস্পতিঃ প্রহরণং বজ্রং সুরাঃ সৈনিকাঃ
স্বর্গো দুর্গমনুগ্রহঃ খলু হরেরৈরাবতো বারণঃ ।
ইত্যৈশ্বর্যবলান্বিতোঽপি বলভিদ্ভগ্নঃ পরৈঃ সঙ্গরে
তদ্ব্যক্তং ননু দৈবমেব শরণং ধিগ্ধিগ্বৃথা পৌরুষম্ ॥ ৮৮॥

ভগ্নাশস্য করণ্ডপিণ্ডিততনোর্ম্লানেন্দ্রিয়স্য ক্ষুধা
কৃত্বাখুর্বিবরং স্বয়ং নিপতিতো নক্তং মুখে ভোগিনঃ ।
তৃপ্তস্তৎপিশিতেন সত্বরমসৌ তেনৈব যাতঃ পথা
লোকাঃ পশ্যত দৈবমেব হি নৃণাং বৃদ্ধৌ ক্ষয়ে কারণম্ ॥ ৮৯॥

কর্মায়ত্তং ফলং পুংসাং বুদ্ধিঃ কর্মানুসারিণী ।
তথাপি সুধিয়া ভাব্যং সুবিচার্যৈব কুর্বতা ॥ ৯০॥

খল্বাটো দিবসেশ্বরস্য কিরণৈঃ সন্তাপিতো মস্তকে
বাঞ্ছন্দেশমনাতপং বিধিবশাত্তালস্য মূলং গতঃ ।
তত্রোচ্চৈর্মহতা ফলেন পততা ভগ্নং সশব্দং শিরঃ
প্রায়ো গচ্ছতি যত্র ভাগ্যরহিতস্তত্রাপদাং ভাজনম্ ॥ ৯১॥

রবিনিশাকরয়োর্গ্রহপীডনং গজভুজঙ্গময়োরপি বন্ধনম্ ।
মতিমতাং চ বিলোক্য দরিদ্রতাং বিধিরহো বলবানিতি মে মতিঃ ॥ ৯২॥

সৃজতি তাবদশেষগুণাকরং পুরুষরত্নমলঙ্করণং ভুবঃ ।
তদপি তৎক্ষণভঙ্গি করোতি চেদহহ কষ্টমপণ্ডিততা বিধেঃ ॥ ৯৩॥

পত্রং নৈব যদা করীরবিটপে দোষো বসন্তস্য কিং
নোলূকোঽপ্যবলোকতে যদি দিবা সূর্যস্য কিং দূষণম্ ।
ধারা নৈব পতন্তি চাতকমুখে মেঘস্য কিং দূষণং
যৎপূর্বং বিধিনা ললাটলিখিতং তন্মার্জিতুং কঃ ক্ষমঃ ॥ ৯৪॥

নমস্যামো দেবান্ননু হতবিধেস্তেঽপি বশগা
বিধির্বন্দ্যঃ সোঽপি প্রতিনিয়তকর্মৈকফলদঃ ।
ফলং কর্মায়ত্তং যদি কিমমরৈঃ কিঞ্চ বিধিনা
নমস্তৎকর্মভ্যো বিধিরপি ন যেভ্যঃ প্রভবতি ॥ ৯৫॥

ব্রহ্মা যেন কুলালবন্নিয়মিতো ব্রহ্মাণ্ডভাণ্ডোদরে
বিষ্ণুর্যেন দশাবতারগহনে ক্ষিপ্তো মহাসঙ্কটে ।
রুদ্রো যেন কপালপাণিপুটকে ভিক্ষাটনং কারিতঃ
সূর্যো ভ্রাম্যতি নিত্যমেব গগনে তস্মৈ নমঃ কর্মণে ॥ ৯৬॥

নৈবাকৃতিঃ ফলতি নৈব কুলং ন শীলং
বিদ্যাপি নৈব ন চ যত্নকৃতাপি সেবা ।
ভাগ্যানি পূর্বতপসা খলু সঞ্চিতানি
কালে ফলন্তি পুরুষস্য যথৈব বৃক্ষাঃ ॥ ৯৭॥

বনে রণে শত্রুজলাগ্নিমধ্যে
মহার্ণবে পর্বতমস্তকে বা ।
সুপ্তং প্রমত্তং বিষমস্থিতং বা
রক্ষন্তি পুণ্যানি পুরা কৃতানি ॥ ৯৮॥

যা সাধূংশ্চ খলান্ করোতি বিদুষো মূর্খান্ হিতান্ দ্বেষিণঃ
প্রত্যক্ষং কুরুতে পরোক্ষমমৃতং হালাহলং তৎক্ষণাৎ ।
তামারাধয় সৎক্রিয়াং ভগবতীং ভোক্তুং ফলং বাঞ্ছিতং
হে সাধো ব্যসনৈর্গুণেষু বিপুলেষ্বাস্থাং বৃথা মা কৃথাঃ ॥ ৯৯॥

গুণবদগুণবদ্বা কুর্বতা কার্যজাতং
পরিণতিরবধার্যা যত্নতঃ পণ্ডিতেন ।
অতিরভসকৃতানাং কর্মণামাবিপত্তে-
র্ভবতি হৃদয়দাহী শল্যতুল্যো বিপাকঃ ॥ ১০০॥

স্থাল্যাং বৈদূর্যময্যাং পচতি তিলকণাংশ্চান্দনৈরিন্ধনৌঘৈঃ
সৌবর্ণৈর্লাঙ্গলাগ্রৈর্বিলিখতি বসুধামর্কমূলস্য হেতোঃ ।
কৃত্বা কর্পূরখণ্ডান্ বৃতিমিহ কুরুতে কো দ্রবাণাং সমন্তাৎ
প্রাপ্যেমাং কর্মভূমিং ন চরতি মনুজো যস্তপো মন্দভাগ্যঃ ॥ ১০১॥

মজ্জত্বম্ভসি যাতু মেরুশিখরং শত্রূন্ জয়ত্বাবহে
বাণিজ্যং কৃষিসেবনে চ সকলা বিদ্যাঃ কলাঃ শিক্ষতাম্ ।
আকাশং বিপুলং প্রয়াতু খগবৎকৃত্বা প্রয়ত্নং পরং
নাভাব্যং ভবতীহ কর্মবশতো ভাব্যস্য নাশঃ কুতঃ ॥ ১০২॥

ভীমং বনং ভবতি তস্য পুরং প্রধানং
সর্বো জনঃ স্বজনতামুপয়াতি তস্য ।
কৃৎস্না চ ভূর্ভবতি সন্নিধিরত্নপূর্ণা
যস্যাস্তি পূর্বসুকৃতং বিপুলং নরস্য ॥ ১০৩॥

কো লাভো গুণিসঙ্গমঃ কিমসুখং প্রাজ্ঞেতরৈঃ সঙ্গতিঃ
কা হানিঃ সময়চ্যুতির্নিপুণতা কা ধর্মতত্ত্বে রতিঃ ।
কঃ শূরো বিজিতেন্দ্রিয়ঃ প্রিয়তমা কানুব্রতা কিং ধনং
বিদ্যা কিং সুখমপ্রবাসগমনং রাজ্যং কিমাজ্ঞাফলম্ ॥ ১০৪॥

অপ্রিয়বচনদরিদ্রৈঃ প্রিয়বচনাঢ্যৈঃ স্বদারপরিতুষ্টৈঃ ।
পরপরিবাদনিবৃত্তৈঃ ক্বচিৎক্বচিন্মণ্ডিতা বসুধা ॥ ১০৫॥

কদর্থিতস্যাপি হি ধৈর্যবৃত্তের্ন শক্যতে ধৈর্যগুণঃ প্রমার্ষ্টুম্ ।
অধোমুখস্যাপি কৃতস্য বহ্নের্নাধঃ শিখা যাতি কদাচিদেব ॥ ১০৬॥

কান্তাকটাক্ষবিশিখা ন লুনন্তি যস্য
চিত্তং ন নির্দহতি কোপকৃশানিতাপঃ ।
কর্ষন্তি ভূরিবিষয়াশ্চ ন লোভপাশৈ-
র্লোকত্রয়ং জয়তি কৃৎস্নমিদং স ধীরঃ ॥ ১০৭॥

একেনাপি হি শূরেণ পাদাক্রান্তং মহীতলম্ ।
ক্রিয়তে ভাস্করেণেব স্ফারস্ফুরিততেজসা ॥ ১০৮॥

বহ্নিস্তস্য জলায়তে জলনিধিঃ কুল্যায়তে তৎক্ষণাৎ
মেরুঃ স্বল্পশিলায়তে মৃগপতিঃ সদ্যঃ কুরঙ্গায়তে ।
ব্যালো মাল্যগুণায়তে বিষরসঃ পীযূষবর্ষায়তে
যস্যাঙ্গেঽখিললোকবল্লভতমং শীলং সমুন্মীলতি ॥ ১০৯॥

লজ্জাগুণৌঘজননীং জননীমিব স্বাং
অত্যন্তশুদ্ধহৃদয়ামনুবর্তমানাম্ ।
তেজস্বিনঃ সুখমসূনপি সন্ত্যজন্তি
সত্যব্রতব্যসনিনো ন পুনঃ প্রতিজ্ঞাম্ ॥ ১১০॥